# संस्कृतवार्ता:

दिनाङ्क :   17.09.2025                                                      सायम्  - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य मध्यमप्रदेशस्य धार-जनपदात् "स्वस्थ-नारी–सशक्त-परिवाराभियानस्य सहैव राष्ट्रियपोषण-मासस्य च शुभारम्भः कृतः। सहैव भैंसोला-ग्रामे भारतस्य प्रथम- पी.एम्.-मित्र-पार्क इत्यस्य आधारशिला संस्थापिता।
- विश्वनेतार: अद्य प्रधानमन्त्रिणे नरेन्द्रमोदिने पञ्चसप्ततितमाय जन्मदिवसाय शुभकामनां अयच्छन् ।
- केन्द्रेण तमिळनाडु-असमयोः ग्रामीण-स्थानिक-निकायेभ्यः द्विचत्त्वारिंशदधिक-त्रिशतकोटिरुप्यतोऽप्यधिकस्य अनुदानं प्रदत्तम्।
- जम्मू-कश्मीर-राज्ये रियासी-जनपदस्य त्रिकुटा-पर्वतस्थले स्थितस्य वैष्णो-देवी-मन्दिरस्य तीर्थयात्रा अद्य पुनरारब्धा। भूस्खलनस्य कारणात् द्वाविंशतिदिनानि यावत् यात्रा स्थगिता आसीत्।

---------------------------------

<u>सांसद्-प्रधानमन्त्री</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य मध्यमप्रदेशस्य धार-जनपदात् "स्वस्थ-नारी–सशक्त-परिवाराभियानस्य सहैव अष्टमस्य राष्ट्रियपोषण-मासस्य च शुभारम्भः कृतः। तेन राज्ये आदि-सेवा-पर्वणः अपि उद्घाटनं कृतम् सहैव धार-जनपदस्य भैंसोला-ग्रामे भारतस्य प्रथम- पी.एम्.-मित्र-पार्क इत्यस्य आधारशिला संस्थापिता।

अवसरेऽस्मिन् भाषमाणः श्रीनरेन्द्रमोदी प्रावोचत् यत् विश्वकर्मा-जयन्त्यवसरे भारतस्य महत्तमस्य एकीकृत-वस्त्र-केन्द्रस्य उद्घाटनं क्रियते ।

---------------------------------

<u>प्रधानमन्त्री-जन्मदिनम्</u>

रूसदेशस्य राष्ट्रपतिः व्लादिमीर-पुतिनः, इज़रायलदेशस्य प्रधानमन्त्री बेंजामिन नेतन्याहू, ब्रिटेनस्य पूर्वप्रधानमन्त्री ऋषि-सुनकः इत्येतान् समेत्य विश्वनेतारः अद्य प्रधानमन्त्रिणं नरेन्द्रमोदिनं पञ्चसप्ततितमे जन्मदिवसे तस्मै शुभकामनां प्रदत्तवन्तः ।

राष्ट्रपतिना पुतिनेन तस्मै जन्मदिनस्य शुभाशंसाः प्रदत्ताः, तथैव भारत-रूसयोः मध्ये सहभागितायाः सुदृढीकरणार्थं श्रीमोदिनः व्यक्तिगत-योगदानमपि प्रशंसितम्। इज़रायलदेशस्य प्रधानमन्त्री बेंजामिन-नेतन्याहुः अवसरेऽस्मिन् नरेन्द्रमोदिनं प्रियसखात्वेन सम्बोधितवान् । इतः पूर्वं अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड-ट्रम्पः अपि प्रधानमन्त्रिणे मोदिने शुभाकामनाम् अयच्छत् । स च सोशल-मीडियासन्देशे रूस-युक्रेनयोः युद्धस्य समाप्तौ श्रीमोदिनः समर्थनस्य प्रशंसाम् अकरोत्।

---------------------------------

<u>प्रधानमन्त्री-जन्मोत्सवः</u>

अशेषे हि देशे प्रधानमन्त्रिणः नरेन्द्रमोदिनः जन्मोत्सव-निमित्तम् रक्तदानाभियानम् प्रचालितम्। सूचना-प्रसारणमन्त्रिणा अश्विनीवैष्णवेन नवदिल्ल्याः आईटीओ-स्थले रक्तदानं कृतम्। अखिलभारतीय-तेरापन्थ-युवक-परिषदा एकस्मिन् दिने त्रिलक्ष-यूनिट-रक्तस्य सङ्ग्रहणं लक्षीकृत्य देशे सप्तसहस्र-शिविराणि आयोजितानि। साधारण-जीवनात् आरभ्य जगतः प्रबलतमेषु राजनैतिकपुरुषेषु अन्यतमत्वं यावत् नरेन्द्रमोदिनः यात्रा अत्यद्भुता अवर्तत ।

---------------------------------

<u>केन्द्रीय-वित्तायोगः</u>

केन्द्रेण तमिळनाडु-असमयोः ग्रामीण-स्थानिक-निकायेभ्यः द्विचत्त्वारिंशदधिक-त्रिशतकोटिरुप्यतोऽप्यधिकस्य अनुदानं प्रदत्तम्। केन्द्रीय-पञ्चायती-राज-मन्त्रालयेन विज्ञापितं यत् पञ्चविंशत्यधिक-द्विसहस्रतमाय षड्विंशति-वर्षाय च तमिळनाडोः कृते सप्तविंशत्यधिक-एकशतकोटिरुप्यकाणि सहैव असमराज्याय चतुर्दशाधिक-द्विशतकोटिरुप्यतोऽप्यधिकानां, प्रथमदेयमूल्यम् निस्सारितम् ।

----------------------------------

## वैष्णो-देवी

जम्मू-कश्मीर-राज्ये रियासी-जनपदस्य त्रिकुटा-पर्वतस्थले स्थितस्य वैष्णो-देवी-मन्दिरस्य तीर्थयात्रा अद्य पुनरारब्धा। भूस्खलनस्य कारणेन द्वाविंशतिदिनानि पर्यन्तं यात्रा स्थगिता आसीत्। अनेन भूस्खलनेन अनेके जनाः मृत्युपगताः, नेकै च जनाः व्रणिताः अभवन्। तीर्थयात्रिणः बहुसंख्यायां तीर्थयात्रायाः आधार-शिविरे कटरानगरे प्राप्यमानाः सन्ति। श्रीमातावैष्णो-देवी-श्राइन-बोर्ड इत्यनेन अद्य प्रातः अनुकूल-ऋतुम् अवलोक्य यात्रा पुनः उद्घोषिता। अनेन निर्णयेन कटरा-नगरे मन्दिरदर्शनाय स्थितानां अनेक-श्रद्धालूनां मुखानि प्रफुल्लानि जातानि।

----------------------------------

## अश्विनीवैष्णव - सेवापर्व

सूचना-प्रसारणमन्त्री अश्विनीवैष्णवः अद्य नवदिल्ल्यां आयोजिते एकस्मिन् कार्यक्रमे डीडी-नेशनल डीडी-न्यूज़् इत्यनयोः कृते सेवा-पर्व्व-निमित्तं विशेष-कार्यक्रमाणां श्रृंखलायाः शुभारम्भं कृतवान्। एतस्मिन् त्रीणि वृत्तचित्राणि एकः विशेष-कार्यक्रमश्च सम्मेलितः। प्रधानमन्त्रिणः नरेन्द्रमोदिनः जन्मदिवसावसरे अद्यारभ्य सेवा-पर्व्व प्रचाल्यते अयञ्च आगामिमासस्य द्वितीय-दिनाङ्कं यावत् प्रचलिष्यति । अवसरेऽस्मिन् श्रीवैष्णवः प्रोक्तवान् यत् भारतेन विश्वस्मिन् स्वकीयं नूतनं परिचयं निर्मितम्। तेन प्रोक्तं यत् नरेन्द्रमोदिना जीवनस्य आरम्भाकालादेव राष्ट्रनिर्माणाय प्रयासः कृतः। मन्त्रिणा कथितं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना राजनीतिः जनसेवायाः माध्यमेन परिवर्तिता।

अत्रावसरे सूचना-प्रसारण-सचिवः संजय-जाजुः प्रोक्तवान् यत् एषः विशेषावसरः वर्तते ,एतस्मिन् जनाः राष्ट्रस्य परिवर्तनात्मक-यात्रां स्वीकुर्वन्ति। तेनोक्तं यत् देशे परिवर्तनस्य, रूपान्तरणस्य, राष्ट्रनिर्माणस्य च कथाः प्रसरन्ति।

----------------------------------

## शाह-सेवा-पखवाडा

केन्द्रीयगृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां प्रवर्तमानस्य सेवा-पखवाड़ा इत्यस्यान्तर्गतं षोडश-शत-कोटिरूप्यकाणां विविध-विकास-परियोजनानां उद्घाटनं शिलान्यासञ्च अकरोत्। त्यागराज-क्रीडाङ्गणे जनसमूहं सम्बोधयन् सः प्रोक्तवान् यत् अद्य आरब्ध-योजनाभिः राष्ट्रिय-राजधान्याः जनाः लाभान्विताः भविष्यन्ति। तेन प्रोक्तं श्रीनरेन्द्रमोदिना स्वकीयं सर्वं जीवनं देशवासिनां कल्याणाय समर्पितम् । गतैकादशवर्षेषु तस्य नेतृत्वे राष्ट्रं सुरक्षितं जातम्, अर्थव्यवस्था सुदृढा अभवत्, निर्धनेभ्यश्च सुविधाः प्रापिताः। तेनोदीरितं यत् मोदी-सर्वकारेण षष्टि-कोटि-जनेभ्यः सुविधाः प्रदत्ताः, पञ्चविंशति-कोटिजनाः निर्धनतातः पारन्नीताः। श्रीशाहेन प्रोक्तं यत् देशः श्रीमोदिनः ऐतिहासिकोलब्धिं न कदापि विस्मरिष्यति ।अद्य उद्घाटितासु योजनासु तावत् दृष्टिबाधिताबालिकानां कृते अटल-दृष्टि-बालिका-छात्रावासः, बौद्धिक-अक्षम-व्यक्तीनां कृते अटल-आशा-गृहम्, सावित्रीबाई- फुले-वरिष्ठ-नागरिक-गृहम् चिकित्सालय-भवनम्,एकाधिकशतम् आयुष्मान्-आरोग्य-मन्दिराणि,सार्धैकशतं रक्तपरिशोधन-केन्द्राणि, आरक्षक-व्यवस्थायै पञ्चसप्तति- ड्रोन-यन्त्राणि च इत्येतानि योजनानि सम्मिलितानि सन्ति । एवमेव द्वयोः अपशिष्ट–ऊर्जा-निर्माण-यन्त्रागारयोः अपि शिलान्यासः सम्पन्नः।

---------------------------------

**वित्तमन्त्री-जीएसटी-परिष्कारः**

केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमण इत्यनया प्रोक्तं यत् नूतन-जीएसटी-परिष्कारेण कर-न्यूनतायाः करणात् जनानां प्रायः द्विलक्ष-कोटि-रूप्यकाणां संरक्षणं भविष्यति। विशाखापत्तनम-नगरे अद्य आयोजिते कार्यक्रमे केन्द्रीय-वित्त-मन्त्रिणा विज्ञापितं यत् कथं पञ्च-प्रतिशतस्य अष्टादश-प्रतिशतस्य च द्वि-स्तरीय-कर-प्रणाली समान्य-जनानां भारं न्यूनीकरिष्यति । तथैव अनेन दैनिक-जीवने आवश्यक-वस्तूनां च मूल्यं न्यूनीभविष्यति एतस्मिन् निर्धनजनाः मध्यवर्गीय-जनाश्च अधिकाधिकं लाभं प्राप्स्यन्ति।

---------------------------------

**पाकिस्तान**

पाकिस्तानदेशस्य उप-प्रधानमन्त्री इशाक-डारः उक्तवान् यत् भारतेन मई-मासे द्वयोः देशयोः मध्ये शत्रुतायां सत्यां तृतीयपक्षस्य मध्यस्थतां निराकृतवान् । श्रीडार इत्यनेन इयं टिप्पणी अरब-इस्लामिक आपात्कालीन-शिखर-सम्मेलनस्यानन्तरं अल-जज़ीरां इत्यस्मै प्रदत्ते साक्षात्कारे कृता। इयं टिप्पणी प्रधानमन्त्री-नरेन्द्रमोदी-सर्वकारस्य समर्थनं करोति, एतस्मिन् प्रोक्तं यत् मई-मासे सिन्दूराभियानस्य समये युद्धविरामार्थं अमेरिका-देशस्य राष्ट्रपति-डोनाल्ड ट्रम्पस्य वक्तव्यं सत्यं नासीत्।

---------------------------------

<u>नीरज-चोपड़ा</u>

भारतस्य कुन्तक-प्रक्षेपकः नीरज-चोपड़ा इत्येषः अद्य चतुरशीति-दशमलव-पञ्चाशीतिः मिटरमितं कुन्तक-प्रक्षेपण-पुरस्सरं पञ्चविंशत्यधिक-द्वि-सहस्त्रतमायां विश्व-एथलेटिक्स-प्रतिस्पर्धायां पुरुषवर्गस्य निर्णायक-द्वन्दे प्रविष्टवान् ।

।इति वार्ता: ।।